# .. sItArAmastotra ..

# ॥ सीतारामस्तोत्र ॥

अयोध्यापुर-नेतारं मिथिलापुर-नायिकाम् ।
राघवाणामलंकारं वैदेहानामलंक्रियाम् ॥ १॥
रघूणां कुलदीपं च निमीनां कुलदीपिकाम् ।
सूर्यवंश-समुद्भूतं सोमवंश-समुद्भवाम् ॥ २॥
पुत्रं दशरथस्याद्यं पुत्रीं जनकभूपतेः ।
वशिष्ठानुमताचारं शतानन्दमतानुगाम् ॥ ३॥
कौसल्यागर्भ-संभूतं वेदिगर्भोदितां स्वयम् ।
पुण्डरीक-विशालाक्षं स्फुरदिन्दीवरेक्षणाम् ॥ ४॥
चन्द्रकान्ताननांभोजं चन्द्रबिंबोपमाननाम् ।
मत्त-मातङ्ग-गमनम् मत्त-हंस-वधू-गताम् ॥ ५॥
चन्दनार्द्र-भुजामध्यं कुंकुमार्द्र-कुचस्थलीम् ।
चापालंकृत-हस्ताब्जं पद्मालंकृत-पाणिकाम् ॥ ६॥
शरणागत-गोप्तारं प्रणिपाद-प्रसादिकाम् ।
कालमेघनिभं रामं कार्तस्वर-सम-प्रभाम् ॥ ७॥
दिव्य-सिंहासनासीनं दिव्य-स्रग्वस्त्र-भूषणाम् ।
अनुक्षणं कटाक्षाभ्यां अन्योन्येक्षण-कांक्षिणौ ॥ ८॥
अन्योन्य-सदृशाकारौ त्रैलोक्यगृहदंपती ।
इमौ युवां प्रणम्याहं भजाम्यद्य कृतार्थताम् ॥ ९॥
अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तितः ।
तस्य तौ तनुतां पुण्यास्संपदः सकलार्थदाः ॥ १०॥
एवं श्रीराचन्द्रस्य जानक्याश्च विशेषतः ।
कृतं हनूमता पुण्यं स्तोत्रं सद्यो विमुक्तिदम् ।
यः पठेत्प्रातरुत्थाय सर्वान् कामानवाप्नुयात् ॥ ११॥
॥ इति हनूमत्कृत-सीताराम स्तोत्रं संपूर्णम्॥

Encoded and proofread by
N. Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated November 14, 2008